PK 541
.V67
1848

FT MEADE
ASIAN

1329

THE LIBRARY OF CONGRESS

1800

Class ______________

Book ______________

WEBER COLLECTION.

1329

1329

10
Vopadeva
Kavikalpadrumah

# कविकल्पद्रुमः

महामहोपाध्याय श्रीवोपदेव गोस्वामि विरचितो

धातुपाठग्रन्थः

परिभाषाटीकासमेतः

---

गवर्णमेण्टसंस्थापितसंस्कृतपाठशालाध्यक्ष श्रीयुत वावु

रसमय दत्त महोदयानामनुज्ञया

श्रीमदनमोहनतर्कालङ्कारैः संस्कृतः

संस्कृतयन्त्रे मुद्रितः

कलिकाता

संवत् १९०५ ।

संवत् 1905 [1848]

PK 541
.V67
1848
Orien
Sans

31500

'08

VEBER COLLECTION.

# कविकल्पद्रुमः

SANSCRIT LIBRARY COLLEGE

शब्दाकरकरग्राममर्थमण्डलमण्डलम् ।
ज्ञानात्मानमनाद्यन्तमादित्यं तमुपास्महे ।

श्रीवोपदेवो धातुपाठं चिकीर्षुः प्रारिप्सितसमाप्तये शिष्टाचारप्राप्तं मङ्गलमाचरति शब्दाकरेत्यादि तं प्रसिद्धमादित्यम् उपास्महे सेवामहे वयमितिशेषः । तच्छब्दोऽत्र प्रसिद्धार्थकत्वात् यच्छब्दं नापेक्षते तथाच तं केशपाशं प्रसमीक्ष्य कुर्य्युर्बालप्रियत्वं शिथिलं चमर्य्य इति कालिदासः। ग्रन्थोत्कर्षख्यापनायादित्यस्य ग्रन्थस्वरूपतां प्रतिपादयन् विशेषणान्याह शब्दाकरेत्यादि । शब्दानामाकरा उत्पत्तिस्थानानि धातवइति यावत् तएव करग्रामः किरणसमूहो यस्य तम् अर्थानां मण्डलं समूहो मण्डलं यस्य तम् । तथाच स्यान्मण्डलं द्वादशराजके च देशे समूहेऽपि च चक्रवाड़ इति विश्वप्रकाशः । ज्ञानमात्मा यस्य तं न विद्येते आद्यन्तौ यस्य तं नित्यमित्यर्थः ।

पद्मे तं प्रसिद्धं पूर्व्वतरधातुग्रन्थम् उपास्महे आदित्यं सूर्य्यमिव इति लुप्तोपमा। अयमुदयति मुद्राभञ्जनः पद्मिनीनामित्यादिवदसाधारणविशेषणैर्विशेष्योपस्थितिर्भवतीति तादृशविशेषणान्याह शब्दाकरेत्यादि। शब्दाकराः करग्राम इव यस्य तम् अर्थमण्डलं मण्डलमिव यस्य तम् उभयत्र लुप्तोपमा। ज्ञानात्मानमिति ज्ञायते अनेनेति ज्ञानं ज्ञानसाधनं तदेव आत्मा यस्य तम् अनाद्यन्तमिति वेदाङ्गत्वान्नित्यमित्यर्थः।

इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः।

सर्व्वेषां प्रवृत्त्यर्थम् आदिशाब्दिकानां मतमालोक्य क्रियत इति वक्तव्ये आदौ जयशब्दपूर्व्वकं तन्नामानि संगृह्णाति। जेस्तुवन्त्वेऽस्तिवन्तीइतिवक्तव्यादन्तुस्थाने अन्तिः। जययुक्ताभवन्तु इत्यर्थः।

मतानि तेषामालोक्य सर्व्वसाधारणः स्फुटः।
धातुपाठः स्वदाद्याद्यक्रमादन्तादिमक्रमः।
कविकल्पद्रुमो नाम पद्यैर्निष्पाद्यतेऽत्र च।
धातवः पठिताः पाठसूत्रलोकागमस्थिताः।

अथ ग्रन्थस्वरूपं निरूपयति मतानीति। तेषामष्टानां मतानि ग्रन्थानालोक्य पद्यैः श्लोकैः कविकल्पद्रुमोनाम धातुपाठो निष्पाद्यते क्रियते मयेति यावत्। सर्व्वेषां

प्रवृत्तये विशेषणान्याह सर्व्वसाधारण इत्यादि। सर्व्वेषां साधारणः समानः सर्व्वसम्मतत्वात्। सर्व्वशब्दस्त्विह बहुत्वादिपरः तेन कृञ कृताविव्यादीनां केनचिदमन्यमानानामपि बहुवादिसम्मतत्वादिहोपन्यासः कुङ् गत्यामित्यादीनाञ्च केनचिन्मन्यमानानामपि बहुवाद्यसम्मतत्वाद्वर्ज्जनमिति। स्फुटोव्यक्तः। धातवः पठ्यन्तेऽस्मिन्निति धातुपाठोग्रन्थः। अत् आद्योयेषां ते अदाद्याः ते आद्या यस्मिन् सोऽदाद्याद्यः सचासौ क्रमश्चेति अदाद्याद्य क्रमः सुष्ठु अदाद्याद्यक्रमो यस्मिन् स स्वदाद्याद्यक्रमः। अत् अन्तो येषां ते अदन्ताः ते आदिमा यस्मिन् सोऽदन्तादिमः सचासौ क्रमश्चेति अदन्तादिमक्रमः स्वदाद्याद्य क्रमोऽदन्तादिमक्रमो यस्मिन् धातुपाठे स तथा। अकाराद्यादि धातुक्रमेणाकारान्तादिधातवो वक्तव्या इत्यर्थः। अत्रापि सुशब्दोपादानात् सजातीयमध्ये विजातीयो न पाठ्यइत्यधिककौशलमिह बोध्यं। यत्तु अथ क्लदषमङ चेति क्लदक्लिदिञङ रुदि इत्येतयोर्म्मध्ये कदादीनां पठनं तत् क्लदि तु रोदने आह्वाने इत्यस्मादादौ क्लदिञङरुदीति पृथग्वाक्यगौरवभयात्। एवं स्तृन्ञस्तृताविति स्तृस्पृन् प्रीतिरक्षाप्राणने इत्येतयोर्म्मध्ये स्रादीनां पाठेऽपि बोध्यम्। कवीनां परस्मैपदादिप्रमाणलिप्सूनां तत्तद्दातृत्वेन कल्पद्रुमइवेति कविकल्पद्रुमः नामेत्यव्ययम्। अभि

धेयमाह अत्र चेति। अत्र ग्रन्थे पाठसूत्रलोकागमेषु स्थिताश्चतुर्विधा धातवः पठिताः पठितुमारब्धाः आदि कर्म्मणि क्तः साङ्गोपाङ्गैरिहोदिता इत्यमरोक्तवत्। पाठ स्थिताः पूर्व्वाचार्य्याणां धातुपाठेषु स्थिताः भवति पचती-त्यादयः। सूत्रस्थिता धातुपाठेषु न दृष्टाः स्तभ्नोति स्तु-भ्नोतीत्यादयः। लोकस्थिता धातुपाठेषु सूत्रेषु च न दृष्टा महाकविप्रयोगेषु दृष्टाः प्रेङ्खोलयत्यान्दोलयतीत्यादयः। आगमस्थिता भाषाविषयेषु धातुपाठसूत्रलोकेषु न दृष्टा वेदेष्वेव प्रयुक्ता जगाति चिकेतीत्यादयः।

पदानिड्वेड्विकरणाद्यनुबन्धगणोदितम्।
कर्म्मोच्चारणमात्रेण स्पष्टमत्रानुबन्धतः।

प्रयोजनमाह पदेति। पदे परस्मैपदात्मनेपदे। अनिट् इटोऽभावः। वेट् इटोविकल्पः। विकरणाः शप्श्यनादयः आदिशब्दात् यजादिभ्वादीनां ग्रहणं। अनुबन्धाश्च गणाश्च तैरुदितम् अनुबन्धगणोदितम्। अत्र ग्रन्थे अनुबन्धोदितं पदानिड्वेड्विकरणादि कर्म्म अनुबन्धतः स्पष्टं गणोदितं कर्म्म उच्चारणमात्रेण गणोच्चारणमात्रेण स्पष्टमिति व्युत्क्रमेणान्वयः। यथा ओगमॢ गत्यामित्यत्र इटोऽभावः क्वां ङप्रत्ययस्यानुबन्धोदितः। भ्वादित्वं परस्मैपदस्य विशेष विधानाभावात् गणोदितमिति।

परोऽनुबन्धः पूर्व्वेषामेकवाक्यस्थधातुषु।

नाम्रेड़िताबन्धेषु न परेषाञ्च मध्यमः ।

अथ परिभाषा भाष्यते परइति । वाक्यमर्थकथनपर्य्यन्तम् एकवाक्यस्थितधातुषु परः परधातुपरस्थोऽनुबन्धः पूर्व्व तरेण सम्बन्धाभावेपि पूर्व्वेषां सर्व्वेषामित्यर्थः । यथा टीक टिकटैाकृत्रैाकतिक्रङ् गत्यामित्यत्र ऋकारङकारैा सर्व्वे षामिति । आम्रेड़ितं द्विस्त्रिरुक्तमित्यमरः । पुनरुक्तै कानुबन्धेषु धातुषु नेयं व्यवस्था । तथाच त्र्यषत्क त्र्यष तञ् द्यान्तावित्यत्र तकारस्य पुनरुक्तत्वात् ञकारो न पूर्वस्य । न परेषाञ्च मध्यमः । मध्यमो धातुद्वयमध्यवर्त्ती अनुबन्धो द्वाभ्यां सम्बन्धेऽपि न परस्य यथा त्र्यषत्क त्र्यषतञ्द्यान्ता वित्यत्र ककारो न परस्य ।

अत्राकारः सुखार्थोऽथानिष्ठाभावादिकर्म्मवेट् ।
इनुस्वानीरनिड्निष्ठ उः क्त्वावेडूस्तु वेट्क ऋः ।
चङग्रह्वोऽथ ऋर्वा ल्टरङ्वानिर्वाथ एः सिचि ।
अवृद्धि रैर्यङादिः स्यादोर्निष्ठातन औरनिट् ।
कस्सुरादिः किल्तुवा गः क्र्यादिर्गिः प्वादिरप्यघूः ।
स ल्वादिर्घो रुदादिर्ङ स्तङ्वान् कर्त्तरि ञात्मने ।
जोज्वलाद्यो ञिरद्यन्त ष्टुः साथुर्डु स्त्रिमग्युतः ।
णः फणादि स्तस्वदन्ता दस्तनादि र्धुधादिकः ।
नः स्वादिः पोमुचादि र्भः श्नमादिर्म्मोनिचीसमोः ।
दीर्घोवा निचि हूस्वो मिर्वा दिवाद्यो युदादिकः ।

लुः स्वपादिश्च लिङ्गादिर्वा वृतादिः शृ तुदादिकः।
ग्निः कुटादिश्च घृत्कदङ्वान् चोजच्चादी र वैदिकः।

अनुबन्धफलान्याह। अत्राकारः सुखार्थः अत्र अनुबन्धेषु मध्ये अकारः सुखार्थः सुखोच्चारणार्थः। यथा धक्क नक्कक नाशन इत्यादौ। अथ आ निष्ठाभावादिकर्म्मवेट् आ आकारानुबन्धो धातुरूपचारात् एवमिकारादौ च बोध्यम्। निष्ठा क्तक्तवतू निष्ठाया वाच्यत्वेन सम्बन्धिनी ये भावादिकर्म्मणी तयोः परयोर्वा इट् यस्मात् स तथा। आकारेतोधोर्भावे आदिकर्म्मणि च विहितयोः क्तक्तवतो रिम् वा इत्यर्थः यथा ञिमिदा स्नेहे भावादिष्ठे वेति मिन्नं मेदितं तेन प्रमिन्नः प्रमेदितः सः। भावादिकर्म्मभ्यामन्यत्र क्तक्तवतोरिम् नेति शेषः यथाआदितइति मिन्नः मिन्नवान्। इनुम्वान् यथा वदिङ् नुत्यभिवादयोः अतएवेदितोनुण् वन्द्यते विष्णुः। नकारमध्यपाठेनैवेष्टसिद्धौ इदनुबन्धकरणम् अगुणे नलोपनिषेधार्थम्। ईरनिड्निष्ठः दीपीङ्क्ष्ट दीपने नेम्डीश्वीति दीप्तः दीप्तवान्। उः क्त्वा वेट् चमु भक्षे पुक्त्विशुदितइति चमित्वा चान्त्वा। ऊस्तु वेट्कः सामान्यविधिना यस्य स्थाने इम् विहितः ऊदितः परस्य तस्य इम्वा सिधू शिवे शास्त्रे वेमूदिति असेधीत् असैत्सीत्। ऋस्वङ्यहृस्वः। चङि ञेः परेऽङि नास्ति हृस्वो यस्य सोऽहृस्वः। ढौकृङ् गत्यां ण्यङुग्ङः स्वइत्यत्र

ऋदित्वर्ज्जनात् अडुढौकत् । अथ ऋर्वा । चङि अह्रस्व इत्यनुवर्त्तते कण् आर्त्तस्वरे भ्राजभ्रासेति अचीकणत् अचकणत् । येषां सप्तमस्वरानुबन्धः कैश्चित् पठ्यते कैश्चिन्न पठ्यते च तेषां ह्रस्वविकल्पज्ञापनार्थोऽयमनुबन्धः । ऌरङ्वान् औगमॢ गत्यां शासुलिद्द्युदिति अगमत् । इर्वा अङ्वानित्यनुवर्त्तते च्युतिर क्षरणे इरितस्तु वेति अच्युतत् अच्योतीत् । अथ एः सिचि अवृद्धिः । सिचि श्यां विहिते सा कटेवृतौ वृषि ह्रसादेःसेमइत्यत्र एदित्वर्ज नात् अकटीत् । ऐर्यंजादिः स्यात् यजैञौ व्यथग्रहेति इयाज ग्रहस्वपाद्यो।रिति इज्या । ओर्निष्ठातनः निष्ठाया स्तो नोयस्मात्स निष्ठातनः रुजो शौ भङ्गे सूल्वाद्योरिति रुग्णः रुग्णवान् । औरनिट् मस्जोशटौ वसोरस्येत्यत्र औदित्वर्जनात् अमांक्षीत् । कस्तुरादिः । गणत्क संख्याने चुभ्यौञ्जिरिति गणयति । किस्तु वा चुरादिर्वा पक्षे गणा न्तरनियमाभावात्सामान्यगणेभ्वादिरित्यर्थः युजकि संयमे योजयति योजति । चुभ्यौञ्जिर्वा इत्यत्र वा शब्दस्य व्यवस्थावाचित्वात् चुरादेर्ञिर्नित्यः चुराद्यन्तर्गणात् युजादेस्तु वा इति । यत्तु चुरधातोरपि किकारानुबन्धत्वं मुग्धबोधे चोरयति चोरतीत्युदाहरणञ्च तत्कदाचित् चुरादेर्ञेरनित्यत्वज्ञापनार्थम् अतएव काव्यकामधेनौ अकिक्लक्षणीत्यत्र स्फुटीकृतमिदं वोपदेवेन । गः क्र्यादिः डुक्रीञग द्रव्यपर्य-

ये दिवसुतुदेति क्रीणाति। गिः प्वादिरपि। अपि शब्दात् क्र्यादिश्च पूञ्गि शोधे प्वादेः ह्रस्व इति पुनाति। अपूः स ल्वादिः। पूवर्जितः स प्वादिर्ल्वादिश्च स्यात्। लूञ गिच्छिदि लुनाति। सूल्वाद्योरिति लूनः लूनवान्। क्तिग्ट्ज्येति लूनिः। घो रुदादिः। लघिर रुद रोदे रुद्भ्योऽयोऽद्व्येति रोदिति। रुदाद्यस्तीति अरोदीत्। ङस्तङ्वान् कर्त्तरि कर्त्तरि वाच्ये तङ्वान् आत्मनेपदी। एधङ वृद्धौ नवशःपमे इति एधते। आत्मने। तङ्वानित्यनुवर्त्तते आत्मने आत्मार्थं फलवति कर्त्तर्य्यात्मनेपदीत्यर्थः अफलवति परस्मैपदीति शेषः। यजैञौ यजते यजमानः यजति याजकः। ञित्त्वान्नवशःपमे इत्यादिनोभयपदप्राप्तौ ञिञ्न्यन्तपिवेत्यादिना नियम्यते नियमश्च फलवत्कर्त्तर्य्येवात्मनेपदमिति चेत्तर्हि अफलवत्कर्त्तर्य्यात्मनेपदनिषेधे फलवत्कर्त्तरि परस्मैपदापत्तिः। फलवत्कर्त्तर्य्यात्मनेपदमेवेति चेत् तर्हि फलवत्कर्त्तरि परस्मैपदनिषेधे अफलवत्कर्त्तर्य्यात्मनेपदापत्तिरित्युभयथैव व्याघातः। वस्तुतस्तु उभयपदप्राप्तौ व्यवस्थेयं फलवत्यात्मनेपदम् अफलवति परस्मैपदमिति। एतच्च पाणिनेरनुरोधात् तथाच वर्द्धमानः। इति लौकिकवाक्येषु व्यभिचारोऽतिपुष्कलः। वेदवाक्येषु यद्यस्ति नियमः केन धार्य्यते। विशेषः पाणिनेरिष्टः सामान्यं सर्व्ववर्म्मणः। सामान्यमनुगृह्णाति तत्राचार्य्यपरम्परेति।

एतेन अकरोदचिरेश्वरः क्षितौ द्विषदारम्भफलानि भस्म सात् इति रघुः। तनोति शुभ्रं गुणसम्पदा यश इत्यादौ फलवत्कर्त्तरि परस्मैपदम्। फलं विश्वापकाराय धत्ते पर्व्वणि पर्वणीति। कमलवनोद्घाटनं कुर्वते ये। ये सूर्य्य रश्मयः। इत्यादावफलवत्कर्त्तर्य्यात्मनेपदमिति। चुरा- देस्तु स्वार्थे विहितञेर्ञकारेण ञित्त्वेऽप्युभयपदं न स्यात् अन्यथा स्मयञक् वितर्के इत्यादेर्ञानुबन्धोवृथा स्यात्। यत्तु धातुपारायणमुग्धबोधयोश्चोरयति चोरयते इत्युभय पदोदाहरणं तत्कदाचिन्महाकविप्रयुक्तस्यात्मनेपदस्य स- माधानार्थम्। यथा नैषधे। नालोकते यथेदानीं मामियं तेन तर्कये इति। अत्र केचित्तु आत्मनेपदमिच्छन्ति पर स्मैपदिनां क्वचिदिति न्यायमवलम्बन्ते। ञोज्वलाद्यः। ज्वल जम चलत्विषोः टूनीभूज्वलाद्येति णः ज्वालः पक्षे पचा दित्वादन् ज्वलः। एवं कुच ञोधपर्ककौटिल्यलेखने टूनी भूज्वलेति णः कोचः पक्षे कृगृज्ञाप्रीति कः कुचः। ञिर द्यन्तः अद्य वर्त्तमाने क्तोयस्मात् सोऽद्यन्तः। ञि ष्ठा स्थाने ञाच्चेच्छार्थेति स्थितोविष्णुस्तिष्ठतीत्यर्थः। टुः साधुः। ऋटुङ वेप चले ट्विलोऽथुरिति वेपथुः। डुस्त्विमग्युतः। क्वञदडुक्तो ड्वितस्त्विञ्जइति त्रिमक् क्विमं। णः फणादिः फणण निस्नेहे टृफलेति फेणतुः पफणतुः फेणिथ पफ णिथ। तस्वदन्तः। अदन्तानां पृथग्वर्गविधानेनैव ज्ञाने

सिद्धे तानुबन्धोऽङ्कादीनां कान्तत्वादिभ्रमनिरासार्थः। ह्स्तनादिः। तनु दजविस्तृतौ। तन्भ्यः स्नुविति तनोति। सेर्लुक् तथासोरिति अतत अतनिष्ट अतथाः अतनिष्ठाः वनतनाद्यनिमामिति प्रतत्य। श्रुधादिकः। रुधिर्धीञ्जि ञाव्रतौ दिवसुतुदेति रुणद्धि। नः स्वादिः षुञ् सन्धा क्लेदपीडमन्थे दिवसुतुदेति सुनोति। पोमुचादिः मुच ॡश्नपञ्जो मोचे नुणर्धामुचामिति मुञ्चति। भः श्रमादिः श्रमुभिर्य्यं श्रमे यन्योश्रमादीति श्राम्यति। मोणिचीस्रमो दीर्घौ वा। घटष् ङम चेष्टे ञीस्रमोस्तु घंज्ञेति अघटि अघाटि घटं घटं घाटं घाटं। णिचि ह्रस्वः मोऽनुवर्त्तते। णिचि ञो ह्रस्वोह्रस्ववान्। घटादिजनीति घटयति। मिर्व्वा। णिचि ह्रस्वइत्यनुवर्त्तते। फणमिणगतौ वा श्रमेति फणयति फाणयति। दिवाद्योयः दिवु जिगीषादौ दिवसु तुदेति दीव्यति। ल अदादिकः। अद्लाभक्षणे लुगद्भ्यो ऽपः अत्ति। लुः स्वपादिश्च चकाराददादिश्च स्वमते स्व-पादेः प्रयोजनं नास्ति। दरिद्रतीत्यादौ स्वपादित्वादजादौ सार्व्वधातुके आद्याक्षरस्य उदात्तस्वरत्वम्भवति आद्युदात्त त्वमिति वोपदेवः। लिङ्गादिः। ङ्कादेरदाद्यन्तर्गणत्वेन स्वातन्त्र्याददादित्वसूचकानुबन्धोन कृतः। अथवा लुः स्वपा दिश्च लिङ्गादिरित्येकं वाक्यं। लु लि इत्युभयानुबन्धौ धातू क्रमात् स्वपादिङ्कादी स्तः काकाक्षिगोलकन्यायेन चकार

स्योभयसम्बन्धाददादौ च इत्यर्थः। क्रादिः पृथग्गणइत्येके अतएव पठन्ति च। भ्वाद्यदादी जुहोत्यादिर्द्दिवादिः स्वादि रेव च। तुदादिश्च रुधादिश्च तनक्र्यादिचुरादयइति। ङ्क लिहोमेऽदने क्रादौरे द्विः जुहोति। वो वृतादिः। वृत ङुव र्त्ट वर्त्तने वृद्भ्योनेम्पइति तेनैव परस्मैपदे वर्त्स्यति विवृत्स्यति आत्मनेपदे तु वर्त्तिष्यते अन्यत्र विवृत्सा विवर्त्तिषा। शः तुदादिकः तुद औश व्यथे दिवसुतुदेति तुदति। शिः कुटादिश्च। चकारात्तुदादिश्च। कुटां णुञ्जीञ्णतीति निय मात् कुट शि कौटिल्ये इत्यादीनाम् अकुटीदित्यादौ न गुणः। नू शि स्तवने इत्यादीनाम् अनुवीत् इत्यादौ न वृद्धिः अगुणत्वादुव च। ष क्तदङ्वान्। आख्यातिकस्यङोऽ प्राप्त्यर्थं क्तदिति विशेषणम्। स्रमते तूभयत्र ङएव। डुञो ष पच पाके भीषिचिन्तीति पचा। चोजक्षादिः। जक्ष क्तलघभक्षहासयोः द्विरुक्तजक्षेति द्विसंज्ञायां त्रिदचोऽ द्वेरिति न नुण् जक्षत् क्लीवे जस्शसोस्तु द्वेः शतुरिति जक्षति जक्षन्ति। आख्यातिकेऽन्तो अन्तोऽद्वेरिति जक्षति अनुस्सिद्वेरिति अजक्षुः। र वैदिकः। वैदिकोवेदेष्वेव प्रयुक्तोनतु भाषायामित्यर्थः। गार्लिस्तुतौ जगाति।

धातवोहन्तिभासार्थाश्चकितावा चुरादयः।

इत्यनुबन्धेन फलं निरूप्य अर्थेनैव प्रयोजनं प्रथयति धा तवइति। हन्त्यर्थाहिंसार्थाः हन्तेर्हिंसार्थएव प्रसिद्धत्वात्।

नेमेकाजाद्युद्दत इति। पाता जेता क्रेता श्रोता कर्त्ता। विशेषविधानात्तु स्यादेव। यथा यमरमनमेति अयासिष्टाम्। सुस्तुधोःसेरिति असावीत् अधावीत्। स्यस्यर्द्दन इति करिष्यति। स्वप्रादेस्तु स्वयितेत्यादि। इतिपरिभाषेति वक्ष्यमाणग्रन्थस्य संक्षेपनिर्व्वाहार्थं सङ्केतविशेषः परिभाषा इत्यर्थः।

अथ धातवो निर्द्दार्य्यन्ते। तत्रादावदन्ताः तेषु च न्हष तञ्जवर्ज्जेषु ककारोऽनुबन्धः सर्व्वेषु तकारः। ननु न्हसाल्लोप इत्यनेनाल्लोपस्य नित्यत्वाददन्तत्वं व्यर्थमिति चेन्न यतः अग्लोपित्वं स्थानिवत्त्वञ्चादन्तत्वप्रयोजनम्। यत्र त्वेते न विद्येते तत्राग्लोपविकल्पनम्। तद्बलादन्यदीर्घश्च पुक् चेत्यङ्कापयत्यतइति। यथाअग्लोपित्वेन अजगवेषदित्यादौ न न्ह्रस्वसन्वद्भावौ। लोपोऽप्यादेशउच्यते इति न्यायात् स्थानिवत्त्वेन कुणयतीत्यादौ न गुणः गणयतीत्यादौ न वृद्धिः। यत्र तु एते न विद्येते अग्लोपित्वस्थानिवत्त्वयोः प्रयोजनं न सम्भवति तत्र धातौ तद्बलाददन्तस्वीकारबलात् अग्लोपविकल्पनम् अकारस्य स्थितिपक्षे दीर्घः पुक्च आदन्तात् पन्च स्यादतोऽङ्कापयतीति सिद्धमिति केचित्। स्वमते तु अग्लोपित्वस्थानिवत्त्वयोः कार्य्यं येषु न स्यात् ते धातवो न्हसन्ता एवावगन्तव्याः तेन अङ्कापयतीत्यादिप्रयोगाः स्वमतविरुद्धा इति बोद्धव्यं नच स्वमतविरुद्धानामिहोप-

न्यासोऽपि विरुद्ध इति वाच्यम् अष्टानां मतान्यालोक्य कर्त्तव्येपरमतोपन्यासेऽपि दोषाभावात् अन्यथा कैश्चिदमन्यमानस्य कृञ्कृताविति भौवादिकस्य पाठो विरुद्धः स्यात्। किञ्च यदि तत्तन्मतैकवाक्यता क्रियते तदाग्लोपविकल्पोऽन्त्यदीर्घश्च मनीषादित्वात् साध्यः। यथा अङ्कधेर्ञिः हसाल्लोपइति अल्लोपः टीविभक्तेर्दिः ञिश्रीत्यङ् " नकारजावनुस्वारपञ्चमौ झलिधातुषु। सकारजः शकारश्च षाट्टवर्गस्तवर्गज " इतिवचनात् ङस्य नप्रकृतित्वे स्यादोनवङ्इति ङकारं हित्वा कि इत्यस्य द्वित्वे कस्य चत्वे निमित्ताभावे नैमित्तिकस्याप्यभावः इति ङस्य नत्वे नस्यानुस्वारे तस्य च ञत्वे आञ्चिकदिति। केचित्तु अङ्कइति ङप्रकृतिं मन्वानाः अङ्कि इत्यस्य खेर्द्वित्वे आङिङ्कदित्याहुः। अत्र ह्रस्वसन्वद्भावयोरसम्भवान्नाग्लोपित्वं गुणवृद्धेरसम्भवात् न स्थानिवत्त्वमिति। केचित्तु द्वित्वेऽपि अकारलोपस्य स्थानिवत्त्वं मन्वानाः क इत्यस्य द्वित्वे अग्लोपित्वान्न सन्वत्कार्य्यम् इत्याञ्चकदित्युदाहरन्ति।

---

## अकारान्तवर्गः।

अङ्काङ्क त्क पदे लक्ष्मण्यंशांस त्क विभाजने।
अर्थ त्कङ् याचनेऽन्ध त्क दृक्क्षयेऽघ त्क तत्कृतौ।
अवधीर त्कवज्ञायामान्दोलतक दोलने।
ऊन त्क परिहाणे स्यादोज त्क बलतेजसोः।
कथ त्क वाक्यप्रबन्धे कल त्क गतिसङ्ख्ययोः।
स्यात्कत्र कत्र कर्त्त त्क शैथिल्ये कर्ण तक् भिदि॥
काल त्क कालोपदेशे कुण त्काभाषमन्त्रयोः।
स्यात् कुमार कुमाल त्क केलौ केत त्क मन्त्रणे।
निश्रावणेऽथ कूण त्क सङ्कोचेऽथ कुह्र त्कङ।
विस्मायनेऽथ कूट त्क दाहे मन्त्रे क्षप त्क तु।
दौर्बल्ये क्षपतक्ष स्यात् क्षेपे खच त्क बन्धने।
खोट खोड़तक क्षेपे खेट खेड़ त्क भक्षणे।
गद त्काभ्रध्वनौ गर्व्व त्कङ् दर्पेऽथ गृह त्कङ।
ग्रहे गण त्क सङ्ख्याने गवेषतक मार्गणे।
गोम त्क लेपने गात्र त्कङ् शैथिल्ये गुणत्क तु।
मन्त्रे गह्व त्क गह्वने चित्र त्क क्षणिकेक्षणे।
लेख्येऽङ्कुते चह्व त्क स्यात् शाठ्ये छद त्क संवृतौ।
छिद्रत्क भेदे छेदत्क छेदे तीरत्क कर्म्मणाम्।
समाप्तावथ तूणत्क सङ्कोचे तुत्थतक् स्तृतौ।
दुःखत्क तत्कृतौ दण्डत्क तत्पाते ध्वनत्क तु।

शब्दे निवासतक् स्तृत्यां प्रेङ्खोलतक चापले।
पटत्क वेष्टने पर्णत्क हारित्ये पदत्कङ।
गतौ पश पषत्कानुपसर्गाद्बन्धबाधयोः।
स्पर्शगत्योः पतत्केश्वगत्योः पारत्क तीरवत्।
पल्यूल पल्युलत्क स्यात् लूनिपूत्योः पुटत्क तु।
संसर्गे पत्तत्क परिग्रहे भामत्क कोपने।
भाजत्क तु पृथक्कृत्यां म्टगत्कङ तु मार्गणे।
महत्क पूजे मूत्रत्क प्रस्रावे मनत्क् धृतौ।
म्टषत्क म्टषतञ् क्षान्तौ मिश्रत्क्युत्यां रहत्क तु।
त्यागे रसत्क त्वास्वादे स्नेहे रूपत्क तत्कृतौ।
रचत्क कृत्यां रूक्षत्क पारुष्ये रङ्गतक् गतौ।
रूषत्क स्याद्विस्फुरणे लज लञ्जत्क भासने।
लड लाडतक क्षेपे ललत्केप्से वरत्क च।
वर्णत्क स्तुतिविस्तारश्लाघ्युद्युक्तिदीपने।
वसत्क वासे वासत्कोपसेवायां व्ययत्क तु।
गतौ वित्तत्क च त्यागे वातत्क गतिसेवयोः।
सुखे वेलत्क कालार्थे ब्रेद्मत्क दृष्टि वराटतक्।
भागे वटत्क वेष्टे च वल्यूल वल्युलत्क तु।
पल्यूलार्थेऽथ वीजत्क व्यजने वीरतङ्क तु।
शौर्य्ये व्रणत्काङ्कचूर्णे श्रथ शार स्लथत्क तु।
दौर्बल्ये श्राम तक् मन्त्रे शूरत्कङ् विक्रमे शठ।

श्वठ त्क दुर्व्वाचि श्रीलतकाभ्यासेऽतिशायने ।
षम ष्टमत्क वैक्लव्ये सान्त्व सामत्क सान्त्वने ।
संग्रामङ्ञतक् युद्धे स्पृहत्केप्से सटत्क तु ।
प्रकाशने सभाजत्क सेवने प्रीतिदर्शने ।
स्थूलत्कङ् वृंहणे सूत्रत्क ग्रन्थे सत्रतङ्क तु ।
सम्बन्धे सन्ततौ सूचत्क पैशुन्ये स्वरत्क तु ।
आक्षेपे स्तेनतक् चौर्य्ये स्तोमत्क श्लाघने स्तनत् ।
कामशब्दे सारतक् दौर्व्वल्ये सुखत्क तत्कृतौ ।
स्फुटत्क स्यादिसरणे स्कन्धत्क तु समाहृतौ ।
स्वन स्यमतकध्याने हिल्लोलतक दोलने ।
इत्यकारन्तधातूनां सद्वात्रिंशच्छतं मतम् ।

---

आकारान्तवर्गः ।

ख्या ल् ख्यातौ कथने गा लिं स्तुतौ जन्मनि गा ङ्कतौ ।
घ्रा गन्धग्रहणे ज्यागि जरायां ज्ञाग बोधने ।
ज्ञा व्म मारणआलोके निशाने तोषणे स्तुतौ ।
ज्ञा क् प्रेरणे दाललूनौ दा तुदाने डु दा ञ्लि च ।
दरिद्रा च्च सु दुर्गत्यां द्रा ल स्वप्ने पलायने ।
डु धा ञ्लि धारणे पुष्टौ दाने ध्माग्नि युतौ ध्वनौ ।
प्सा ल भक्षे प्राल पूर्त्तौ पा पाने पा ल रक्षणे ।
भा ल्ष दीप्तौ मा ङ्लि शब्दे मा ल्च मानेऽथ माङ्य च ।

भ्राभ्यासे या लु गतौ राल दाने लाल् च ग्रहेऽथवाक् ।
सुखाप्ति गतिसेवासु स्याद्दाल् गमनहिंसयोः ।
श्राल् खेदे श्राल्मपाके भि ष्ठा स्थाने ष्णा ल शोधने ।
श्रो हाक्लित्याग श्रो हाङ्गतावान्ताश्चिरष्टधा ।

---

इकारान्तवर्गः ।

इ इ लु गतावधी लु स्मृत्यामधीङ्ध्ययने किलि ।
ज्ञाने क्षि नग ष हिंसायां क्षि क्षयैश्वर्य्ययोः क्षिश ।
वासगत्योश्चिरिनं हिंसे चिन् चिञ् चित्यान्तु चिक्षि च ।
जिरिनं हिंसे ञभिभवे जि जये चाथ धिष् धृतौ ।
पि ष गतौ डुमिञन् क्षेपे रिष् गतौ श्रि ञ सेवने ।
श्चिनञ् निशाने ट्वायोश्वीर्गतिवृद्ध्योः ष्मि ङ स्मिते ।
ष्मिन्गञ् बन्धे ष्वि कङ नादरे हिन् वर्द्धने गतौ ।
एकोनविंशतिरमी इकारान्तास्तु धातवः ।

---

ईकारान्तवर्गः ।

ई ल कान्ति गति व्याप्ति क्षेप प्रजन खादने ।
ईङ्य गत्यां क्षी ञ हिंसे डु क्री ञग् द्रव्यपर्य्यये ।
ञी गि कि ज्यान श्रो डीङ्य गतौ डीङ्च नभोगतौ ।
णी ञ प्रापण श्रो दीङ्य क्षये दी धीर्ङ्दसुदेवने ।
दीप्तावाधी ङ्य श्राराधे नादरे प्री ञ तर्पणे ।

प्रीक्च प्री गञ कान्तौ च प्रीङ्य प्रीतौ तु पीङ्यतु ।
पाने ञि भी लि भित्यां भ्री ग गि भृत्याश्च मीङ्यतु ।
मी ञ ग्वधे मी कि गत्यां मत्यां रीगि रवे गतौ ।
श्रा रीङ्य क्षरणे ली कि द्रावणे लीङ्य श्रा श्लिषि ।
लील्पी गिच ल्वी ग्गि गत्यां वेवी दर्लुङ् वी ल ईलवत् ।
व्री ग्गि वृत्यां व्रीङ्य श्रा च ह्ली गि गत्याश्च प्रीङ्ञि ।
स्वप्ने श्री ञ ग् पचि ह्री लि लज्जेऽमी पञ्चविंशतिः ।

---

### उकारान्तवर्गः ।

उ ङ शब्दे ऊर्णु लञाच्छादने टु क्षु ल क्षुते ।
कु ङ् शब्दे कुलच् कुशिडार्त्तस्वरे क्ष्णु लतेजने ।
खुङ् ध्वनौ गु शि श्रा विष्ठोत्सर्गे गु घु ङु ङ ध्वनौ ।
च्यु क् ह्रासे सहने च्युक्षु ज्यु जुङ् गत्यां जु रंहसि ।
णुल् स्तुतौ तुल् वृत्तिहिंसापूर्त्तिषु द्रु श्रुतौ गतौ ।
द्रुन्नं दु टुवोऽनुतापे दु गतौ घु लभिसर्पणे ।
धु ञ् कम्पे ञि ध्रु शि ध्रु स्थैर्य्ये प्रुप्लुङ च सर्पणे ।
यु लिमिश्रणेऽमिश्रणे युञ् ग बन्धे युङ्क निन्दने ।
रु ल् ध्वनौ रुङ् बधे गत्यां श्रु गतौ श्रुन् गतौ श्रुतौ ।
षुञ् सन्धाक्लेदपीड़ामन्थे षु ञ गतौ षु च ।
षु ल्चैश्वर्य्यप्रसवयोः ष्णुल्प्रस्तुत्यां ष्टु ञ ल्स्तुतौ ।

सु स्वर्थे सुञ् गतौ स्नुप्र जुहृतौ स्रु द्रुवत् ऊलि ।
होमेऽदने क्रु डुलु चौर्य्ये त्रयस्त्रिंशदुदन्तकाः ।

---

ऊकारान्तवर्गः ।

कू शि डार्त्तस्वरे कूञ्ग शब्दे गू ओ शि विट्सर्जे ।
णू शि स्तवन ओ दूङ्य खेदे द्रूञ्ञ् बधे गतौ ।
धू शिक् कम्पे धूल्गिधू ञच् पूङ्शोधे पूङ्य पूञ्गि च ।
ब्रू ल जुक्तौ भूकङ् भूञ प्राप्तौ भूक् शुद्धिचिन्तयोः ।
मिश्रणे भू तु सत्तायां मूङ बन्धे लूगिञ् छिदि ।
षूङ् षू योङ सूतौ षूश् क्षेपे ऊतस्त्रयोदश ।

---

ऋकारान्तवर्गः ।

ऋर्न हिंसे ऋर्लि गत्याम्च प्रापे च क्षृ ञन् बधे ।
क्षृ ञ् क्षतौ क्षृ ञ् द डु च गृ घृ सेके घृर्लि भासि च ।
वृक् सेके छादने जृ न्यक्कारे जागृ दलु जागरे ।
दृ ङ् शादरे दृ स्थगणे ध्वृ कौटिल्ये धृ श ङ् स्थितौ ।
धृ स्व धृत्यां धृ क्च धृ ङवध्वंसे पृ लि पालने ।
पृ क्च पूर्त्तौ पृ न प्रीतौ पृ शङ् व्यायामके भृ लि ।
टुडु भृ ञ् भृतिपुष्टेराम्र्ं शङ् भृतौ वृग्न वृञ् वृतौ ।
वृ क्चाय वृ ङ्क संभक्तौ स्वृ ऊ शब्दोपतापयोः ।
स्तृ नञ् स्तृतौ स्तृ क्च स्तृ र्लि स्तृ गतौ स्मृ स्मृतौ स्मृ म ।

औत्क्ये त्तृ स्तृन् प्रीतिरक्षाप्राणने कृ ध्रुवत् हृ लि र्।
प्रसह्यकृत्यां हृ ञ् हृत्यामृदन्तास्त्वेकविंशतिः।

---

## ॠदन्तवर्गः।

ॠ गि गत्यां कॄ ञ् गि हिंसे कॄश् विक्षेपेऽथ कॄ कङ।
विज्ञाने गॄ ङ्क विज्ञापे च गॄ श्निगरणेऽथ गॄ।
गि शब्दे ज गि कि ज्याने ज इर्षम्यच भा ष्य च।
तॄ तरेऽभिभवे प्लुत्यां दॄ गि दॄ भ्मियि दॄ य गि।
विदारे न्दॄ गि न्दॄ न्नीतौ जि पॄ गि लि तु पालने।
पॄ क्च पूर्त्तौ वॄ गि वृत्यां भ्रत्यां भ्रॄ गि भ्रतौ भ्रजि।
भर्त्से म्रॄ गि बधे वॄ गिञ् वृत्यां भ्रॄ स्तॄ गि हिंसने।
स्तॄञगि छादने प्रोक्ता ॠकारान्तास्तु षोड़श।

---

## एकारान्तवर्गः।

दे ङ् पालनेऽथ धे ट् पाने मे ङ् प्रतीदानके ञ वे।
स्यूतौ व्ये ञै वृतौ ह्वे ञै स्पर्द्ध शब्दे षड़पराः।

---

## ऐकारान्तवर्गः।

कै शब्दे छै क्षये खै तु स्थैर्य्ये खननहिंसयोः।
गै गाने ग्लै क्लमेऽथो जै क्षये त्रै ङ् पालनेऽथ दै प्।
शोधने ध्यै न्यक्करणे द्रै स्वप्ने ध्यै तु चिन्तने।

ध्रै तृप्तौ प्यै ङ् वृद्धौ पै शोषे म्लै कान्तिसंक्षये।
रै शब्दे ओ वै शोषे श्रै स्वेदे श्रै स्पचने मतः।
ष्ट्यै ङ् गतौ षै क्षयेऽथ ष्टै वेष्टे ष्ट्यैत्र संहतौ ध्वनौ।
स्त्यै च खै पचि सै क्षित्यामैदन्ताः पञ्चविंशतिः।

---

ओकारान्तवर्गः।

छो य लूनौ ज्यो ङ्नि यमव्रतादेशोपनीतिषु।
दो य च्छेदे शो य् निशाने षो यान्ते पञ्च ओपराः।

---

इत्यजन्ताः।

---

कान्तवर्गः।

अकिक् लक्ष्मण्यकि ङ् गत्यां चाकम वक्रगतेऽर्क क।
तापस्तुत्योः कक्क हासे कक् ङिच्छागर्व्वचापले।
ककि ङ व्रजने कुक् ङ त्वादाने किष्क कङ् बधे।
चक ञ ञ्म प्रतीघाततृप्त्योत्र श्चीक कि मर्षने।
चक्क चिक्क चुक्क कर्त्तौ टकि क् बन्धेऽथ टीक टिक्।
ढौक त्रौक तिक्क ङ् गत्यां तिक्न्स्कन्दे बधे तकि।
दौस्थेत्र तक् सहने हासे तर्कक् दीप्तौ त्वकि ङ् गतौ।
द्रेक ध्रेकृङ् स्वनोत्साहे धक्क नक्क क नाशने।
निष्क क् ङ माने फक्कासद्व्यवहारे शनैर्गतौ।
बुक्क कि स्वादिशब्दे ऽथ मस्क मक्कङ् गतौ मकिङ्।

भूषे रेक्ट ङ शङ्कायां रक् लक क् खाद अयने ।
लोक्ट क् दीप्तौ लोक्ट डीचे वष्क वक्ट ङ् गतौ वकिङ् ।
कौटिल्येऽपि च वृक् ङ त्वादाने वल्क क भाषणे ।
शक ण्य शक्लृ शक्तौ शकि ङ त्रासशङ्कयोः ।
श्रक् स्लक् श्वकि ङ सुक् सर्पे शीक्ट ङ् सेके च शीक कि ।
आमर्षे च स्लोक्ट ङ सङ्घाते सुल्क क् च सर्ज्जने ।
वर्ज्जने श्वल्क क् च भाषे षेक्ट ष्वक्क ङ सर्पणे ।
षृक्क स्तक्म प्रतीघाते सीक क्यात्यपि सीक्ट ङ ।
सेके सकि स्रक्क ङ च गत्यां स्रेक् सेक्ट ङित्यपि ।
हिक्क ञ् कूजेऽथ हिक्क क् ङ हिंसे कान्तोनषष्टिका ।

---

खान्तवर्गः ।

इखिखीखुख्युख गतावोखृ शोषालमर्थयोः ।
कक्षे कक्ख खक्ख हासे णख् गतौ द्राख ध्राखृ तु ।
शोषार्थे नख् मख मखि रखि रख् रिखि सर्पणे ।
राख् लाखृ ओ खृवल्लिख् श लेखने लिखि लख् लखि ।
वखि वख् स्वपि शाख् स्लाखृ व्याप्तौ खान्तैकविंशतिः ।

---

गान्तवर्गः ।

अग्म वक्रगतेऽगी गि गत्यां कम्मे क्रियासु तु ।
जुगि त्यागे त्वगि गते त्वगि कम्पे गते तगि ।

स्खलने च तिम हिंसास्कन्दयोर्म्मगि सर्पणे।
मार्गक् संस्कारे च मार्गक्यन्वेषे युगि वर्ज्जने।
रग्मे शङ्के रगक् स्वात् रग् रिग् लिगि गतौ लिगिक्।
चित्रे लगि गतौ खञ्जे लग्मे सङ्गे लगक् स्के।
वगि खञ्जे वुगि त्यागे वल्ग श्रगि स्लगि व्रजे।
षग ष्ठग सग स्थग्मे संवृतौ स्वगि सर्पणे।
हृग ह्लग्मे संवरणे गान्ताः स्युः सप्तविंशतिः।

---

## घान्तवर्गः।

अर्घ मूल्ये ऽघि ङ गतौ निन्दारम्भजवेष्वथ।
स्याद्रगघ घग्घ हसने चघ तिघ् दघ्न घातने।
दघि त्यागे ऽवने द्राघृ ङ श्रमायामशक्तिषु।
ङ ध्राघृ शक्तौ मघि ङ कैतवाद्यर्थयोर्म्मघि।
भूषे रघिक् भासि रघिङ् गमने राघ लाघृङ।
शक्तौ लघि ङ्ङभुगत्योर्लघि शोषे लघिक् लिघि।
वघि ङ्ङ्घ्यर्थके शिघ्याघ्राणे स्लाघृ ङ कत्थने।
ष्टिघ्न ङास्कदि षघ् सघ्न हिंसे घान्तास्तु विंशतिः।

---

## चान्तवर्गः।

अर्चक् पूजे ञ्चर्च चाचि चाचि ञ्चच ञु गतेऽन्चु च।

मिश्रोक्तौ चान्च क व्यक्ता वुचि र्य समवायने ।
ऋच् श नुत्यां कुच श्रोधपर्ककौटिल्यलेखने ।
कुच् तारशब्दे कुच श्रि सङ्कोचे कच् रवे कचि ।
कच्ङ बन्धविशेषः क्रुञ्च गत्यां क्रुन्च च वक्रणे ।
तौक्ष्ण्ये खच ग् भूतिपूत्योरुत्पत्तौ ग्लुन्चु इर्गतौ ।
ग्रुच ग्लुचिरु चौर्य्ये च चञ्चितौ चर्च केङ्समः ।
चर्च जर्च झर्च स्तुतौ भर्त्से तन्चु ध सङ्कुचि ।
तन्च त्वञ्चितौ त्वच् श् वृत्यां पिचक् छेदे डु शौष्यच ।
पाके पचौ ङ पचिङ व्यक्तीकारे पचिक् ततौ ।
पृच् कि संयमने पृच् धी च सम्पर्के पृची ल् ङ च ।
मचि ङुक्त्यधृत्यर्चाभाःसु मच् ङ च कल्कने ।
दम्भे शाठ्ये मुच् मुचिङ् च मुच्क मोक्षे मुच् लश्प्णौ ।
मोक्षे म्रुच् म्लुचु इर्गत्यां म्रुन्च म्लुन्च मन्च् मुन्चु च ।
टु डु याचृञ् याचने रिच् कि सम्पर्कवियोगयोः ।
रिचिर्धो विरेके रुच् ङल्ट प्रीतिप्रकाशयोः ।
लोचृक् भासि लोचृ ङीक्षे लुन्चापनयने वचौ ।
वाचि वच् क च सन्देशे वञ्चु वाचि विचिर्धो ञ् ।
पृथक्त्वे व्यच शि व्याजे सम्बन्धे कङ् वन्च् वञ्चने ।
वन्चु गत्यां वर्चङ् दीप्तौ ब्रश्चूश् छेदे वृचीध् वृतौ ।
श्वच श्वचि शचिङ्गत्यां शचङ् वाचि शुचिर्य जी ।
शौचे विशरणे क्लेदे शुच् शोके षच् ङ सेचने ।

षच् सम्बन्धे षन्च गतौ षिच्प श्नौञ् च्चरणे छुच ।
ङ प्रसादे चकारान्ताः पञ्चाशत्समुदीरिताः ।

---

## छान्तवर्गः ।

आञ्छायामेऽथोञ्छि शुञ्छे उच्छीश् बन्धसमापने ।
वर्ज्जनेऽतिक्रमेऽथर्च्छश् मूर्त्तौ गमनमोहयोः ।
जर्च्छ झर्च्छ श भर्त्सोक्त्योः प्रच्छीश् ज्ञीप्सेऽथ पिच्छ श ।
मिच्छश् बाधे म्लेच्छ् छि देश्योक्तौ मूर्च्छा मोहउच्छ्रये ।
युच्छ् प्रमादे लाञ्छि लच्छ लक्ष्मणे विच्छ क त्विषि ।
विच्छ श् गतौ वाञ्छि कामे स्वुर्च्छ स्फुर्च्छा तु विस्तृतौ ।
ऊर्च्छा कौटिल्यके ह्रीच्छ लज्जे छान्तोनविंशतिः ।

---

## जान्तवर्गः ।

अज क्षेपे गतेऽजि क् तु भास्यर्ज्ज त्वर्ज्जनेऽर्ज्ज क ।
संस्कारेऽञ्जू ध जि व्यक्तिगतिम्रक्षण ईजि तु ।
ईज् ङ कुत्से गतावुज प्रार्जवेऽथोर्जक् जीवने ।
बलेऽथोर्जङ्कृतिस्थैर्य्योर्जनार्जन ऋजिङ् भृजि ।
एजृङ् दीप्तावेजृ कम्पे ओलज्युत्क्षेपणे क्षजिक् ।
तङ्के क्षजि क्षज ष् मङ् दागत्योः क्षीज् कूज द्दिक्काने ।
कर्ज पीडे़ कुज खुजु स्तेये खर्ज व्यथार्हजोः ।
खज् मन्थे खजि पाङ्गुल्ये गज् मदे गजि च स्वने ।

गज गर्ज क च गर्जौर्जौ शब्दे गटजि गटज ध्वनौ ।
गुज ध्यस्मिन् गुजि गुज कूजने जजि जज् युधि ।
जर्ज श वाग्भर्त्सयोः गिंज् लि ञ्जौ पेषे गिजिल्ङ च ।
शुद्धौ तुजिक् भाषद्वार्थे तुजि प्राणे बले तुज ।
हिंसे ङ् तर्जक् तर्ज भर्त्से त्यजौ हानौ तिज क् क्षिते ।
तिज ङ् क्षान्तौ च तन्जु ध सङ्कोचे धृजि धृज् ध्रजि ।
ध्रज् ध्वजि ध्वज् ध्रिज गतावानज् ङौ ह्रियि पूज क ।
पूजे पिजिक् भाषद्वार्थे पिजि लङ् वर्णपूजयोः ।
स्यात् पूजि ल् ङच सम्पर्के भज ञौ भागसेवयोः ।
भज क् पाके भजि क् भासि भ्रेजृङ् च भ्राज णङ् टु च ।
भुजो शौ वक्रणे भुज् धौ त्राणे भक्षे भ्रजी ङ तु ।
भर्जने भ्रस्जौञ् शपाके भञ्जो धौ मोटने मुजि ।
मुज्मन्ज्मार्जक् मृजाध्वन्ये । मृंज् लूष् शुद्धौ मृजूष् कि तु ।
भूषे च मस्जो श ट्वौ स्यात् स्नाने युज कि संयमे ।
युजिर्धौ ञ् च युतौ युज्यौ ङ समाधौ युज क् ङ तु ।
निन्दे यजै ञौ देवार्चादानसङ्गतौ रुज क् ।
हिंसे रुजो शौ भङ्गे रिज् ङृज्यर्थे रन्ज्य रन्ज मौ ञ् ।
रागे रेजृङ् राजृञ् ण दीप्तौ लाज् लाजि भर्त्सने ।
भर्गेऽथ लस्जी ओ लज् ङ व्रीडे लज् लजि भर्त्सने ।
लज् कान्तद्धौ लज लुजि क् भाषद्वार्थे विजि लिं ञौ ।
वेके विजी धौ विज् ङी शौ भीकम्पे ल् व्रज् ङि व्रज् ङ ली ।

त्यागे वृजी कि च वृजीध् वृतौ व्रज गतौ व्रजक् ।
संस्कृतौ च विरेफौ तौ भ्रिजि ल् कि ङस्फुटध्वनौ ।
षन्जौ भि सङ्गे ष्वन्जौ भि ङालिङ्गे षस्ज सर्पणे ।
षर्ज सर्जने स्वज्यौङ् विसर्गेऽथ स्वजौ श च ।
ट्वो स्फुर्जा वज्रनिर्घोषे जकारान्ता द्विसप्ततिः ।

---

झान्तवर्गः ।

उज्झ श् त्यागे जर्झ झर्झश् भर्त्सोक्तौ झान्तिमास्त्रयः ।

---

टान्तवर्गः ।

अट्ट क् तौच्छ्ये ऽनादरे ऽट्टात्‌टाट्टाङतिक्रमे बधे ।
अट इट् कट् कटि कटी गत्यामे कट् वृतौ वृषि ।
कीट् बन्धवर्णयोः कूट्कङप्रसादाप्रदेोः कुटि ।
वैकल्ये कुट् भि कौटिल्ये कुट् कुट्टक् ङ प्रतापने ।
कुट्टक् कुत्साच्छिदेोः किट् कट्वत् खिट् च भयभीषयेोः ।
खट्टक् वृतौ खोट्ट गत्याघाते खट् काङ्क्षि गोष्ठ ङ ।
सङ्घाते घट्क हिंसे च घटि कपि द्युतौ घट ष् ।
ङम चेष्टे घुट्ङ्ल्ट परीवर्त्तौ घुट्भि प्रतीहृतौ ।
घट्टक् चाले घट्ट ङच चिट प्रेषे चटक् बधे ।
चट्च भेदे चेष्ट ङीहे चुट्टक् चुट् चुटि तुच्छने ।
चुटिक् छेदे चुट् छुटक भ्रि च जट् झट संहृतौ ।

णट् नृत्यहिंसयोर्णाघ्न नृतौ तट् काहृतौ तट ।
उच्छ्राये तुट् शि कलहे त्रुट काङ् त्रुष्य शि च्छिदि ।
नट णट्वृत् नटक् भ्रंशे पट कच्च त्विषि पट् गतौ ।
पुट् शि श्लेषे पुटक् चूर्णे भासि पिट् संहतौ ध्वनौ ।
पुट्टक् तौच्छ्रे बुट् कि हिंसे भट् भृतौ भट्ट भाषणे ।
म्लेट म्रेट मेट्टृ न्मादे मुटि मर्द्दे कि मुट् क्षुदि ।
मुट्शि त्वाक्षेपे च यौटृ सम्बन्धे रौट्नादरे ।
